संस्कृत

स्तोत्र

ग्रं. नं. १८३

अच्युताष्टक = (शंकराचार्य

६७८/स्तो. ७

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

॥श्रीकृष्णाजयराम श्रीरामचंद्राय नमः

1

श्रीरामाय नमः॥ अच्युतं केशवं राम नारायणं कृष्ण दामोदरं
वासुदेवं हरिं॥ श्रीधरं माधवं गोपिकावल्लभं जानकीना
यकं रामचंद्रं भजे॥१॥ अच्युतं केशवं सत्यभामाधवं माधवं
श्रीधरं राधिकाराधनं॥ इंदिरामंदिरं चेतसा सुंदरं देवकी
नंदनं नंदजं संधदे॥२॥ विष्णवे जिष्णवे शंखिने चक्रिणे रुक्मि
णीरागिणे जानकीजानये॥ वल्लवीवल्लभायार्चितायात्मने कं
सविध्वंसिने वंशिने ते नमः॥३॥ कृष्ण गोविंद हे राम नाराय
ण श्रीपते वासुदेवाजित श्रीनिधे॥ अच्युतानंत हे माधवाधो
क्षज द्वारकानायक द्रौपदीरक्षकः॥४॥ राक्षसैः क्षोभितो सीत
या शोभितो दंडकारण्यभूपुण्यताकारणः॥ लक्ष्मणेनान्वितो
वानरैः सेवितो गस्त्यसंपूजितो राघवः पातु मां॥५॥ धे
नुकारिष्टकोनिष्टकृद्वेषिणां केशिहा कंसहृद्वंशिकावादकः॥
पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु मां सर्वदा
॥६॥ विद्युदुद्योतकः प्रस्फुरद्वाससा प्रावृडंभोदवत्प्रोल्लसद्विग्रहं
॥ वैजयंती विभा शोभितोरस्थलं लोहितांघ्रिद्वयं वारिजाक्षं भ
जे॥७॥ कुंचितैः कुंतलैर्भ्राजमानाननं रत्नमौलिं लसत्कुंडलं
गंडयोः॥ हारकेयूरकं किंकिणी उज्ज्वलं कंकणप्रोज्ज्वलं श्याम
लं भावयेत्॥८॥ अच्युतस्याष्टकं यः पठेत्स्य हं प्रेमतः प्रत्यहं
सस्पृहः॥ सर्वतः सुंदरं तंच विश्वंभरोतस्य वश्यो हरि
र्जायते सत्वरं॥९॥ इति श्रीपरमहंसपरिव्राजकाचार्य श्री
मच्छंकराचार्यविरचितं अच्युताष्टकं स्तोत्रं संपूर्णं॥ध

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com